कन्यस्वरूपिणः" शा०ति० । व्याख्यातमेतत् पदार्थादर्शे "अविद्याशवलितत्वेन जड़त्वे कथं तस्य सृष्टिकर्त्तृत्वमिति? शङ्कां वारयति सच्चिदानन्दविभवादिति अनेनाविद्योपहितत्वेऽपि तस्य न स्वरूपहानिरित्यर्थः । सकलाच्छक्तिरासीदिति योजना । शक्तिसहितोदेवः पुनः शक्तिस्तस्मात् सा कथमासीदिति ? चेत् सत्यं या अनादिरूपा चैतन्याध्यासेन महाप्रलये सूक्ष्मा स्थिता तस्या गुणवैषम्यानुगुणतया सात्विकराजसतामससृष्टव्यप्रपञ्चकार्य्यसाधने उच्छूनरूपत्वमेवोपचारादुत्पत्तिः । इदं सांख्यमतेनोक्तम् । प्रयोगसारे "तस्माद्विनिर्गता शक्तिः सर्वगा विश्वसम्भवा" । वायुसंहि० "शिवेच्छया परा शक्तिः शिवतत्त्वैकतां गता । ततः परिस्फुरत्यादौ सर्गे तैलं तिलादिवेति" । पञ्चरात्रेऽपि "एवमालोच्य सर्गादौ सच्चिदानन्दरूपिणीम् । समस्ततत्त्वसंबन्धत्वात् स्फूर्त्त्यधिष्ठातृरूपिणीम् । व्यक्तां करोति तां नित्यां प्रकृतिं परमः पुमान्" तस्या एव नादविन्दू सृष्ट्युपयोग्यवस्थारूपौ तदुक्तं प्रयोगसारे "नादात्मना प्रबुद्धा सा निरामय पदोन्मुखी । शिवोन्मुखी यदा शक्तिः पुंरूपा सा तदा स्मृता । सैव सर्गक्षमा" अन्यत्रापि "अभिव्यक्ता परा शक्तिरविनाभावलक्षणा । अखण्डा परचिच्छक्तिर्मता चिद्रूपिणी विभुः । समस्ततत्त्वभावेन विवर्त्तेच्छासमन्विता । प्रयाति विन्दुभावं च क्रियाप्राधान्यलक्षणम्" । इच्छाशक्त्यादिरूपतया विन्दोस्त्रैविध्यमाह परेति साक्षात् परशक्तिमयः अतः पश्चात्तदवस्थात्मकत्वमेवोक्तम् असौ त्रिधा भिद्यते । एतौ नादविन्दू प्रथमोक्तनादविन्दुभ्यामन्यौ तदुक्तं "स विन्दुर्भवति त्रिधा" । विन्द्वादेर्भेदत्रयस्वरूपमाह विन्दुरिति । ततस्तस्मात् विन्दोः रौद्री यतस्तस्याः शिवमयत्वम् अतोऽन्वर्थताऽपि । नादाज्ज्येष्ठेति । सर्वश्रेष्ठत्वेनावस्थितत्वेनान्वर्थता ज्ञेया । वीजाद्वामा अजायतेति सम्बन्धः तस्याः सुन्दरत्वादन्वर्थत्वम् । तदुक्तं प्रयोगसारे "विन्दुः शिवात्मकस्तत्र वीजं शक्त्यात्मकं स्मृतम् । तयोर्योगे भवेन्नादस्तेभ्यो जातास्त्रिशक्तयः । रौद्री विन्दोः समुद्भूता ज्येष्ठा नादादजायत । वामा वीजादभूच्छक्तिस्ताभ्यो देवास्त्रयोऽभवन्" । ते इति ज्ञानमिच्छा क्रिया च तदात्मानस्ते रुद्रब्रह्मरमाधिपाः क्रमेणेच्छाशक्तिक्रियाशक्तिज्ञानशक्तिस्वरूपाः । अतएव रुद्रादयः निरोधकाले वह्नीन्द्वर्कस्वरूपिणः शक्तेरेवावस्थाविशेषा ज्ञेयाः एषामिच्छाक्रियाज्ञानात्मकशक्तित उत्पन्नत्वात् । वत्प्रते च "इच्छाज्ञानक्रियात्मानः" इति । ईश्वरप्रत्यभिज्ञायाम् "यतदिच्छति तज्ज्ञातुं कर्तुं वा स्वेच्छया क्रियाम् । अनन्तरं हि तत्-कार्य्यज्ञानं दर्शनशक्तितः । ज्ञानशक्तिस्तया ज्ञेयोयोऽसौ स्थूलसमुद्यमः । सा क्रियाशक्तिरुदिता यतः सर्व्वं जगत् सृजेत्" गोरक्षसंहितायाम् "इच्छा क्रिया तथा ज्ञानं रौद्री ब्राह्मी तु वैष्णवी । त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति"

**क्रियासमभिहार** पु० सम्+अभि+हृ–घञ् इत० । क्रियायाः पौनःपुन्ये । "क्रियासमभिहारे घञ्" पा० "क्रियासमभिहारेण विराध्यन्तं क्षमेत कः?" इति माघः ।

**क्रियास्नान** न० क्रियाङ्गं स्नानम् । शङ्खोक्ते स्नानविधिभेदे तत्प्रकारो यथा "क्रियास्नानं प्रवक्ष्यामि यथावद्विधिपूर्व्वकम् । मृद्भिरद्भिश्च कर्त्तव्यं शौचमादौ यथाविधि । जले निमज्य उन्मज्य उपस्पृश्य यथाविधि । तीर्थस्यावाहनं कुर्य्यात्तत् प्रवक्ष्याम्यशेषतः । प्रपद्ये वरुणं देवमम्भसां पतिमर्च्चितम् । याचेत देहि मे तीर्थं सर्वपापापनुत्तये । तीर्थमावाहयिष्यामि सर्व्वाघविनिसूदनम् । सान्निध्यमस्मिन् तोये च क्रियतां मदनुग्रहात् । रुद्रान् प्रपद्ये वरदान् सर्वानप्सुसदस्तथा । सर्वानप्सुसदश्चैव प्रपद्ये प्रयतः स्थितः । देवमंशुसदं वह्निं प्रपद्येऽघनिसूदनम् । आपः पुण्याः पवित्राश्च प्रपद्ये शरणं तथा । रुद्राश्चाग्निश्च सर्पश्च वरुणस्त्वाप एव च । शमयन्त्वाशु मे पापं माञ्च रक्षन्तु सर्वशः । हिरण्यवर्णातिसृभिर्ज्जगतीति चतसृभिः । शन्नोदेवीति च तथा शन्नआपस्तथैव च । इदमापः प्रवहते द्व्यृचञ्च समुदीरयेत् । एवं सम्मार्जनं कृत्वा च्छन्दआर्षञ्च देवताः । अघमर्षणसूक्तञ्च प्रपठेत् प्रयतः सदा । छन्दोऽनुष्टुप् च तस्यैव ऋषिश्चैवाघमर्षणः । देवता भावहृत्तस्य पापक्षये प्रकीर्त्तितः । ततोऽम्भसि निमग्नः स्यात्त्रिः पठेदघमर्षणम् । प्रदद्यान्मूर्द्धनि तथा महाव्याहृतिभिर्जलम् । यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः । तथाघमर्षणं सूक्तं सर्वपापप्रणाशनम् । अनेन विधिना स्नात्वा स्नातवान् धौतवाससा । परिवर्तितवासास्तु तीर्थनामानि संजपेत् । उदकस्याप्रदानात्तु स्नानशाटीं न पीड़येत् । अनेन विधिना स्नातस्तीर्थस्य फलमश्नुते" ।

**क्रियेन्द्रिय** न० क्रियायाः साधनमिन्द्रियम् । वाक्पादादौ कर्म्मेन्द्रिये हेम० ।

**क्रिवि** पु० कृवि–इन् नि० । १कूपे निघण्टुः २कर्त्तरि ३हिंसके